श्रीगणेशायनमः॥श्लोक॥वर्णानामर्थसं
घानांरसानांछंदसामपि॥मंगलानांचकर्त्तारौवं
देवाणीविनायकौ॥१॥भवानीशंकरौवंदेश्रद्धा
विश्वासरूपिणौ॥याभ्यांविनानपश्यंतिसिद्धाः
स्वांतस्थमीश्वरं॥२॥वंदेबोधमयंनित्यंगुरुं
शंकररूपिणं॥यमाश्रितोहिवक्रोपिचंद्रःस
र्वत्रवंद्यते॥३॥सीतारामगुणग्रामपुण्यारण्य
विहारिणौ॥वंदेविशुद्धविज्ञानौकवीश्वरकपीं०
॥४॥उद्भवस्थितिसंहारकारिणींक्लेशहारिणीं
सर्वश्रेयस्करींसीतांनतोहंरामवल्लभां॥५॥
यन्मायावशवर्त्तिविश्वमखिलंब्रह्मादिदेवासुराः
यत्सत्वादमृषैवभातिसकलंरज्जौयथाहेर्भ्रमः
यत्पादप्लवमेकमेवहिभवांभोधेस्तितीर्षावतां
वंदेहंतमशेषकारणपरंरामाख्यमीशं
हरिं॥६॥नानापुराणनिगमागमसंमतंयद्रा
मायणेनिगदितंक्वचिदन्यतोपिस्वांतः सुखाय
तुलसीरघुनाथगाथाभाषानिबंधमतिमं
जुलमातनोति॥७॥०॥श्रीरस्तु॥०॥०॥